# ।। प्रकरणम्–५ ।।

# ।। पुराणेषु सांख्ययोगवेदान्तविमर्शः ।।


| क्रमः | प्रकरणनाम | पृष्ठाङ्कः |
|---|---|---|
| ५.१ | प्रस्तावना । | 289-323 |
| ५.२ | पुराणेषु पुरुषसिद्धिः । | |
| ५.२.१. | संघातपरार्थत्वात् । | |
| ५.२.१.१. | श्रीमद्भागवतपुराणे संघातपरार्थत्वम् । | |
| ५.२.२. | त्रिगुणादिविपर्ययात् । | |
| ५.२.२.१. | श्रीमद्भागवतपुराणे त्रिगुणादिविपर्ययः । | |
| ५.२.३. | अधिष्ठानात् । | |
| ५.२.३.१. | श्रीमद्भागवतपुराणेधिष्ठानम्। | |
| ५.२.४. | भोक्तृभावात् । | |
| ५.२.४.१. | श्रीमद्भागवतपुराणे भोक्तृभावात् । | |
| ५.२.५. | द्रष्टृभावात् । | |
| ५.२.५.१. | श्रीमद्भागवतपुराणे द्रष्टृभावात् । | |
| ५.२.६. | कैवल्यार्थप्रवृत्तेः । | |
| ५.२.६.१. | श्रीमद्भागवतपुराणे कैवल्यार्थप्रवृत्तिः । | |
| ५.२.६.२. | अग्निपुराणे कैवल्यार्थप्रवृत्तिः । | |
| ५.२.६.३. | श्रीनारदपुराणे कैवल्यार्थप्रवृत्तिः । | |
| ५.२.६.४. | श्रीमत्स्यपुराणे कैवल्यार्थप्रवृत्तिः । | |
| ५.२.६.५. | श्रीकूर्मपुराणे कैवल्यार्थप्रवृत्तिः । | |
| ५.३ | पुराणेषु पुरुषबहुत्ववादः । | |
| ५.३.१. | जननम् । | |
| ५.३.१.१. | श्रीविष्णुपुराणे पुरुषबहुत्ववादजननम् । | |

५.३.२. मरणम् ।
५.३.२.१. श्रीविष्णुपुराणे पुरुषबहुत्ववादमरणम् ।
५.३.३. करणम् ।
५.३.३.१. श्रीविष्णुपुराणे पुरुषबहुत्ववादकरणम् ।
५.३.४. अयुगपत्प्रवृत्तिः ।
५.३.४.१. श्रीविष्णुपुराणे पुरुषबहुत्ववादेयुगपत्प्रवृत्तिः ।
५.३.५. प्रतिनियमात् ।
५.३.५.१. श्रीविष्णुपुराणे पुरुषबहुत्ववादप्रतिनियमः ।
५.३.६. त्रैगुण्यविपर्ययः ।
५.३.६.१. श्रीविष्णुपुराणे पुरुषबहुत्ववादत्रैगुण्यविपर्ययः ।
५.४ पुराणेषु पुरुषधर्म्माः ।
५.४.१ श्रीमद्भागवतपुराणे पुरुषधर्म्माः ।
५.४.२ श्रीब्रह्माण्डपुराणे पुरुषधर्म्माः ।
५.४.३ श्रीलिङ्गपुराणे पुरुषधर्म्माः ।
५.४.४ श्रीवायुपुराणे पुरुषधर्म्माः ।
५.५ पुराणेषु सृष्टिव्यवस्था ।
५.५.१. श्रीविष्णुपुराणे सृष्टिव्यवस्था ।
५.६ पुराणेषु बुद्धिस्वरूपम् ।
५.६.१. श्रीमद्भागवतमहापुराणे बुद्धिस्वरूपम् ।
५.७ पुराणेषु अहङ्कारस्वरूपम् ।
५.७.१. श्रीमद्भागवतमहापुराणे बुद्धिस्वरूपम् ।

## प्रकरणम् ५ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।

### ५.१ प्रस्तावना ।

**विद्यासहायवन्तं च आदित्यस्थं समाहितम् ।**
**कपिलं प्राहुराचार्याः सांख्यनिश्चितनिश्चयाः ॥**

भारतीयसंस्कृतिः प्रारम्भादेव दीप्तेरुपासिका वर्तते । भारतीयसंस्कृतेः मूलाधारो वेदो मन्यते, किन्तु वेदार्थस्य निर्णायकानीतिहासपुराणानि सन्ति, अतो महाभारतं कथयति यद् –

**इतिहासपुराणाभ्यां वेदं समुबृंहयेत्[1] ॥**
**पुराणात्पुराणम्[2] ॥**

अनेन प्रकारेण पूरणातायाः सम्पादकत्वेन पुराणानि वेदानां प्रामाणिकस्य अर्थस्य प्रतिपादकानि सन्ति, अतः श्रीमद्भागवतस्य प्रथमे स्कन्धे श्लोकोयं पुराणानां संकीर्तनं करोति यथा –

**इतिहासं पुराणं च पञ्चमो वेद उच्यते[3] ॥**

सर्वेषां वेदानामर्थस्यावगतये समेषां पुराणानामध्ययनमतीवाश्यकमस्ति, नारदीयपुराणस्यानुसारं वेदानामपेक्षया पुराणानामर्थस्य विशेषं महत्त्वं प्रदत्तं वर्तते, कथं यद् – वेदाः पुराणेषु प्रतिष्ठिताः सन्ति तद्यथा –

**वेदार्थादधिकं मन्ये पुराणार्थं वरानने ।**
**वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः ॥**
**पुराणमन्यथा कृत्वा तिर्यग्योनिमवाप्नुयात् ।**
**सुदान्तोपि सुशान्तोपि न गतिं क्वचिदाप्नुयात्[4] ॥**

---

1 म. भा. आदिपर्व-१।२६७

2 श्रीविष्णुपुराणम्-प्रस्तावना- पृ. सं. क

3 श्री. भा. १।४।२०

4 श्रीविष्णुपुराणम्-प्रस्तावना- पृ. सं. ग

**वेदवन्निश्चलं मन्ये पुराणार्थं द्विजसत्तमाः ।**
**वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः ।।**
**बिभेत्यल्पश्रुताद्वेदो मामयं चालयिष्यति ।**
**इतिहासपुराणैस्तु निश्चलोयं कृतः पुरा ।।**
**यन्न दृष्टं हि वेदेषु तद्दृष्टं स्मृतिषु द्विजाः ।**
**उभयोर्यन्न दृष्टं हि तत्पुराणैः प्रगीयते ।।**
**यो वेद चतुरो वेदान् साङ्गोपनिषदो द्विजाः ।**
**पुराणं नैव जानाति न च स स्याद्विचक्षणः**[१] **।।**

एतानि पुराणान्यपि वेदानामिवापौरुषेयाणि सन्ति । पुराणेषु वक्तुर्नाम आयाति, स वेदानामिव वक्ता वर्तते, प्रणेता नास्ति[२], इममेव पुराणानां महिमानं ध्यायं ध्यायं वामनपुराणं कथयति यद् -

**आख्यानैश्चाप्युपाख्यानैर्गाथाभिर्द्विजसत्तमाः ।**
**पुराणसंहिताश्चक्रे पुराणार्थविशारदः ।**
**यच्छिष्टं तु यजेर्वेद इति शास्त्रार्थनिर्णयः**[३] **।।**

एतत्सर्वमवलोक्य वेवेष्टि व्याप्नोति विश्वमिति विष्णुः, अथवा वेषति नाम सिञ्चति आप्यायते विश्वमिति विष्णुः, अथवा विषून् अत्ति मायापसारेण संसारादिति विष्णुः, तादृशानां पुराणानां मया 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति महाशोधनिबन्धस्य विषयो गृहीतः । अस्य मम महाशोधनिबन्धस्य पञ्चमे प्रकरणे पुराणेषु पुरुषसिद्धिः, पुराणेषु पुरुषबहुत्ववादः, पुराणेषु पुरुषधर्म्माः, पुराणेषु सृष्टिव्यवस्था, पुराणेषु बुद्धिस्वरूपम् , पुराणेषु अहङ्कारस्वरूपम्, इत्यादीनां विषयाणां विवेचनं विस्तारतया मया क्रियते तद्यथा -

---

1 स्कन्दपुराणम्-प्रभासखण्डः- २।९०-९३

2 श्रीविष्णुपुराणम्-प्रस्तावना- पृ. सं. ख

3 वामनपुराणम्-६०।२१-२२

५.२ पुराणेषु पुरुषसिद्धिः ।

**संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात् ।**

**पुरुषोस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च[1] ।।**

प्रकृतेस्तथा तद्विकारादतिरिक्तपुरुषनामकमेकं स्वतन्त्रं तत्त्वं वर्तते, अस्य पुरुषस्यास्तित्वं निर्विवादपूर्णमस्ति । 'अहं जानामि' अनेनानुभवेन पुरुषस्यास्तित्वं सिद्धं याति, तथा 'अहमस्मि' इममनुभवं सर्वे कुर्व्वन्ति, अयमनुभवः सहजः स्वाभाविकश्च वर्तते, तद्विपरीतं 'अहमस्मि नास्मि' इति स्वस्यास्तित्वस्य विषये कश्चिदपि संशयो नास्ति । सांख्यदर्शनस्य मतानुसारं पुरुषस्यास्तित्वं स्वयंसिद्धमस्ति । अस्याः सत्ताया निषेधोपि भवितुन्नार्हति, तथापि येषां पुरुषस्यास्तित्वस्य विषये संशयो वर्तते, तेषां निराकरणं सांख्याचार्य्याः षड्भिः कारणैरनेन प्रकारेण कुर्व्वन्ति तद्यथा –

१. संघातपरार्थत्वात् ।

२. त्रिगुणादिविपर्ययात् ।

३. अधिष्ठानात् ।

४. भोक्तृभावात् ।

५. द्रष्टृभावात् ।

६. कैवल्यार्थं प्रवृत्तेः ।

सांख्याचार्य्याः 'पुराणेषु पुरुषसिद्धिः ' इति विषयस्य चर्चामनेन प्रकारेण कुर्व्वन्ति तद्यथा –

---

[1] सांख्यकारिका–१७

५.२.१. संघातपरार्थत्वात् ।

संघातस्यार्थो वर्तते यत्समुदायः, प्रकृतिस्तथा तद्विकाराः त्रयाणां गुणानां समुदायरूपाः सन्ति, यद्वस्तु संघातरूपे वर्तते, तदपरेषां कृतेस्तित्वस्य विषयोस्ति । रथपर्यङ्कगृहादयो संघातरूपा वर्तन्ते, तेषामस्तित्वमपरेषां कृते विद्यते, रथारूढः, पर्यङ्के शयनकर्ता, गृहे निवासकाः, इत्यादीनां प्रयोजनाय रथपर्यङ्कगृहादीनामस्तित्वमस्ति । प्रकृतितद्विकाराणामस्तित्वमपि ततो भिन्नमेकं तत्त्वमेव पुरुषो वर्तते ।

५.२.१.१. श्रीमद्भागवतपुराणे संघातपरार्थत्वम् ।

इमामेव चर्चां कुर्व्वन् श्रीमद्भागवतकारः तृतीयस्कन्धस्य द्वात्रिंशेढ ध्याये कथयति तद्यथा -

**क्ष्माम्भोनलानिलवियन्मनइन्द्रियार्थ-**
**भूतादिभिः परिवृतं प्रतिसंजिहीषुः ।**
**अव्याकृतं विशति यर्हि गुणत्रयात्मा**
**कालं पराख्यमनुभूय परः स्वयम्भूः ।।**
**एवं परेत्य भगवन्तमनुप्रविष्टा**
**ये योगिनो जितमरुन्मनसो विरागाः ।**
**तेनैव साकममृतं पुरुषं पुराणं**
**ब्रह्म प्रधानमुपयान्त्यगताभिमानाः ।।**
**अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयम् ।**
**श्रुतानुभावं शरणं व्रज भावेन भामिनि**[१] **।।**

अनेन प्रकारेण पुरुषार्थसिद्धेः संघातपरार्थत्वनामको विषयः सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयात् पुरुषार्थसिद्धेः त्रिगुणादिविपर्ययो विषयोत्रैव समाप्यते ।

---

1 श्रीमद्भागवतपुराणम्-३।३२।९-११

५.२.२. त्रिगुणादिविपर्ययात् ।

त्रिगुणादीनां विपर्ययः, इति त्रिगुणादिविपर्ययः, तस्मात् त्रिगुणादिविपर्ययादिति । असंघातरूपं वा असंहतं तत्त्वमेव पुरुषः, अयमेव पुरुषः सत्त्वरजस्तमसां संघातरूपो नास्ति अत्रिगुणादिकत्वे पुरुषे विवेकित्व-सामान्यत्व- प्रसवधर्मित्वादयो धर्मा अपि न सन्ति, इदं त्रिगुणादिविपर्यये सति स्वयमेव फलितं भवति ।

५.२.२.१. श्रीमद्भागवतपुराणे त्रिगुणादिविपर्ययः ।

इमामेव चर्चां कुर्व्वन् श्रीमद्भागवतकारः तृतीयस्कन्धस्य द्वात्रिंशेढध्याये कथयति तद्यथा -

**रजसा कुण्ठमनसः कामात्मानोजितेन्द्रियाः ।**
**पितॄन् यजन्त्यनुदिनं गृहेष्वभिरताशयाः ।।**
**त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः ।**
**कथायां कथनीयोरुविक्रमस्य मधुद्विषः[1] ।।**
**पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि ।**
**तदन्यकल्पनापार्था ज्ञानं च प्रकृतेर्गुणः ।।**
**प्रकृतिर्गुणसाम्यं वै प्रकृतेर्नात्मनो गुणाः ।**
**सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः ।।**
**सत्त्वं ज्ञानं रजः कर्म तमोज्ञानमिहोच्यते ।**
**गुणव्यतिकरः कालः स्वभावः सूत्रमेव च[2] ।।**

अनेन प्रकारेण पुरुषार्थसिद्धेः त्रिगुणादिविपर्ययो नामको विषयः सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयात् पुरुषार्थसिद्धेः त्रिगुणादिविपर्ययो विषयोत्रैव समाप्यते ।

---

[1] श्रीमद्भागवतपुराणम्-३।३२।११-१३

[2] श्रीमद्भागवतपुराणम्-११।२२।२६-२८

५.२.३. अधिष्ठानात् ।

सर्वेषां जडवस्तूनां चालकं निर्देशकं च चेतनमेव भवति यथा – रथस्य चालकश्चेतनवान् मनुष्यो वर्तते, तथैव यन्त्रक्रियाणां नियामकोपि चेतनवान् मनुष्यो भवति, प्रयोजनत्याः सर्वस्याः क्रियायाः प्रेरणा चेतनेनैव भवितुमर्हति । पुरुषेण अधिष्ठिता प्रकृतिः प्रवृत्तिं करोति, अतः प्रकृतिः स्वयं क्रियाशीला वर्तते, परन्तु सा क्रिया कस्यां दिशि भवेत् ? इति नियमनं तु पुरुष एव करोति, अतः पुरुषः प्रकृतेः प्रवर्तकत्वेन स्वीकृतो भवति कारणमस्ति यत्प्रकृतेः प्रवृत्तिः सदा सर्वदा सर्वथा च प्रयोजनपूर्विका वर्तते ।

५.२.३.१. श्रीमद्भागवतपुराणेधिष्ठानम्।

इमामेव चर्चां कुर्व्वन् श्रीमद्भागवतकारः तृतीयस्कन्धस्य द्वात्रिंशेढ ध्याये कथयति तद्यथा –

**स तदैवात्मनात्मानं निःसङ्गं समदर्शनम् ।**
**हेयोपादेयरहितमारूढं पदमीक्षते ।।**
**ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् ।**
**दृश्यादिभिः पुथग्भावैर्भगवानेक ईयते ।।**
**एतावानेव योगेन समग्रेणेह योगिनः ।**
**युज्यतेभिमतो ह्यर्थो यदसङ्गस्तु कृत्स्नशः**[1] **।।**

अनेन प्रकारेण पुरुषार्थसिद्धेरधिष्ठाननामको विषयोयं सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयात् पुरुषार्थसिद्धेः त्रिगुणादिविपर्ययोयं विषयोत्रैव समाप्यते ।

---

[1] श्रीमद्भागवतपुराणम्–३।३२।२५–२७

५.२.४.	भोक्तृभावात् ।

प्रकृतिस्तथा प्रकृतिविकारा सुखदुःखमोहात्मकाः सन्ति, अनेन समग्रं जडजगद्भोग्यमस्ति, अतस्तस्य भोक्ता कश्चिदपि भवितुमर्हति । सुखी दुःखी च सुखदुःखाद्भिन्नो भवितुमर्हति । सुखं स्वयं स्वमेव कदापि न भुनक्ति, तथैव दुःखं स्वयं स्वमेव कदापि न भुनक्ति, भोग्यः स्वयमेव सुखं दुःखं च भुनक्ति, इति कथयितुं स्वीकर्तुं न शक्नुमः , अतो भोक्ता स्वयमेव पुरुषो वर्तते ।

५.२.४.१.	श्रीमद्भागवतपुराणे भोक्तृभावात् ।

इमामेव चर्चां कुर्व्वन् श्रीमद्भागवतकारः तृतीयस्कन्धस्य द्वात्रिंशेढ ध्याये कथयति तद्यथा –

**तच्छ्रद्धयाक्रान्तमतिः पितृदेवव्रतः पुमान् ।**
**गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ।।**
**यदा चाहीन्द्रशय्यायां शेतेनन्तासनो हरिः ।**
**तदा लोका लयं यान्ति त एते गृहमेधिनाम् ।।**
**ये स्वधर्मान्न दुह्यन्ति धीराः कामार्थहेतवे ।**
**निःसङ्गा न्यस्तकर्माणः प्रशान्ताः शुद्धचेतसः ।।**
**निवृत्तिधर्मनिरता निर्ममा निरहंकृताः ।**
**स्वधर्माख्येन सत्त्वेन परिशुद्धेन चेतसा ।।**
**सूर्यद्वारेण ते यान्ति पुरुषं विश्वतोमुखम् ।**
**परावरेशं प्रकृतिमस्योत्पत्त्यन्तभावनम्[1] ।।**

अनेन प्रकारेण पुरुषार्थसिद्धेर्भोक्तृभावनामको विषयोयं सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयात् पुरुषार्थसिद्धेः त्रिगुणादिविपर्ययोयं विषयोऽत्रैव समाप्यते ।

---

[1] श्रीमद्भागवतपुराणम्–३।३२।३–७

५.२.५. दृष्टृभावात् ।

प्रकृतिस्तथा प्रकृतिविकारा दृश्याः सन्ति, त्रिगुणात्मकत्वेन बुद्धिरपि दृश्या वर्तते । द्रष्टारमन्तरेण दृश्यं कथयितुं न शक्नुमः, तेन कारणेन प्रकृत्यादयो दृश्यतो भिन्नो द्रष्टा भवेदिति स्वीकर्तव्यमेव, अयमेव द्रष्टा स्वयमेव पुरुषो वर्तते ।

५.२.५.१. श्रीमद्भागवतपुराणे दृष्टृभावात् ।

इमामेव चर्चां कुर्व्वन् श्रीमद्भागवतकार एकादशस्कन्धस्य द्वाविंशेध्याये कथयति तद्यथा –

**प्रकृतिः पुरुषश्चोभौ यद्यप्यात्मविलक्षणौ ।**
**अन्योन्यापाश्रयात्कृष्ण दृश्यते न भिदा तयोः ।।**
**प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथात्मनि ।**
**एवं मे पुण्डरीकाक्ष महान्तं संशयं हृदि ।**
**छेत्तुमर्हसि सर्वज्ञा वचोभिर्नयनैर्गुणैः ।।**
**त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेत्र शक्तितः ।**
**त्वमेव ह्यात्ममायया गतिं वेत्थ न चापरः[१] ।।**
**ममाङ्ग माया गुणमय्यनेकधा विकल्पबुद्धीश्च गुणैर्विधत्ते ।**
**वैकारिकास्त्रिविधोध्यात्ममेकमथाधिदैवमधिभूतमन्यत् ।।**
**दृग्रूपमार्कं वपुरत्र रन्ध्रे परस्परं सिध्यति यः स्वतः खे ।**
**आत्मा यदेषामपरो य आद्यः स्वयानुभूत्यालिखसिद्धसिद्धिः ।**
**एवं त्वगादि श्रवणादि चक्षुर्जिह्वादि नासादि च चित्तयुक्तम्[२] ।।**

अनेन प्रकारेण पुरुषार्थसिद्धेर्द्रष्टृभावनामको विषयोयं सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयात् पुरुषार्थसिद्धेः त्रिगुणादिविपर्ययोयं विषयोत्रैव समाप्यते ।

---

[1] श्रीमद्भागवतपुराणम्–११।२२।२६–२८

[2] श्रीमद्भागवतपुराणम्–११।२२।३०–३१

५.२.६.	कैवल्यार्थप्रवृत्तिः

सर्वो मनुष्यो मुक्तेरिच्छां करोति, मुक्तिर्नाम दुःखत्रयस्यात्यन्तिकी निवृत्तिरस्ति, यद् दुःखस्वरूपं वर्तते, तस्मान्मुक्तिः कदाचिदपि संभवा नास्ति, अतो मुक्तियोग्यं तत्त्वमेव नास्ति, तदा मुक्तेश्चर्चा योग्या नास्ति, अतो दुःखस्वरूपस्य तत्त्वस्य स्वीकारं विना किमपि भवितुन्नार्हति, सैव दुःखात्मिकय प्रकृत्या तथा तद्विकारैर्भिन्नः स्वयमेव पुरुषो वर्तते ।

६.२.६.१.	श्रीमद्भागवतपुराणे कैवल्यार्थप्रवृत्तिः ।

समेषां जीवानां कैवल्यार्थप्रवृत्तिनाम्नीमिमामेव चर्चां सर्व्वाणि पुराणानि कुर्व्वन्ति, तत्र विशेषरूपेण श्रीमद्भागवतकारः तृतीयस्कन्धस्य सप्तविंशेध्याये कथयति तद्यथा –

**मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा ।**
**निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयम् ।।**
**प्राप्नोतीहाञ्जसा धीरः स्वदृशाच्छिन्नसंशयः ।**
**यद्गत्वा न निवर्तेत योगी लिङ्गाद्विनिर्गमे ।**
**यदा न योगोपचितासु चेतो**
**मायासु सिद्धस्य विषज्जतेङ्ग ।**
**अनन्यहेतुष्वथ मे गतिः स्याद्**
**आत्यन्तिकी यत्र न मृत्युहासः[१] ।।**
**यज्जलस्पर्शमात्रेण ब्रह्मदण्डहता अपि ।**
**सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः[२] ।।**
**न ह्येतत्परमाश्चर्यं स्वर्धुन्या यदिहोदितम् ।**
**अनन्तचरणाम्भोजप्रसूताया भवच्छिदः ।।**
**संनिवेश्य मनो यस्मिञ्छ्रद्धया मुनयोमलाः ।**

---

[1] श्रीमद्भागवतपुराणम्–३।२७।२८–३०

[2] श्री. भा. पुराणम् ९।१२

**त्रैगुण्यं दुस्त्यजं हित्वा सद्यो यातास्तदात्मताम्[१] ।।**

५.२.६.२. अग्निपुराणे कैवल्यार्थप्रवृत्तिः ।

अग्निपुराणे गयामाहात्म्यस्य वर्ण्णनं कुर्वन् अग्निदेवः स्वयमेव लिखति यद् -

**ब्रह्मज्ञानं गयाश्राद्धं गोगृहे मरणं तथा ।**
**वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधा[२] ।।**
**यस्य हस्तौ च पादौ च पुनश्चैव सुसंयुतम् ।**
**विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते[३] ।।**

५.२.६.३. श्रीनारदपुराणे कैवल्यार्थप्रवृत्तिः ।

**शप्तः कथं वसिष्ठेन सौदासो नृपसत्तमः ।**
**गङ्गाबिन्द्वभिषेकेण पुनः शुद्धोभवत्कथम्[४] ।।**
**तुलसीदलसंमिश्रमपि सर्षपमात्रकम् ।**
**गङ्गाजलं पुनात्येव कुलानामेकविंशतिम् ।।**
**तस्माद्विप्र महाभाग सर्वशास्त्रार्थं कोविद ।**
**गङ्गाजलप्रदानेन पाह्यस्मान्पापकर्मणः[५] ।।**
**षडमासं तत्र गङ्गायां स्नात्वा दृष्ट्वा सदाशिवम् ।**
**ब्राह्मणीदत्तशापात्तु मुक्तो मित्रसहोभवत्[६] ।।**
**तस्मान्महिम्नो विप्रेन्द्र गङ्गायाः शक्यते नहि ।**
**पारं गन्तुं सुराधीशैर्ब्रह्मविष्णुशिवैरपि ।।**

---

1 श्री. भा. पुराणम् ९।१४-१५

2 अग्निपुराणम् ११५।५

3 अग्निपुराणम् १०९।१

4 श्रीनारदपुराणम् ९।१

5 श्रीनारदपुराणम् ९।१२५-१२६

6 श्रीनारदपुराणम् ९।१४२

**यन्नामस्मरणादेवमहापातककोटिभिः ।**
**विमुक्तो ब्रह्मसदनं नरो याति न संशयः[१] ।।**
**गङ्गा गङ्गेति यन्नाम सकृदप्युच्यते यदा ।**
**तदैव पापर्निमुक्तो ब्रह्मलोके महीयते[२] ।।**

तथा च तत्र नैकानि तीर्थानि कथयित्वा मोहिनी स्वयमेव कामाख्यानाथस्य माहात्म्यस्यान्ते कथयति यथा -

**एतत्ते सर्वमाख्यातं कामोदाख्यानकं शुभम् ।**
**यः शृणोति नरो भक्त्या सोपि पापैः प्रमुच्यते[३] ।।**

महाफलदायिनः प्रभासतीर्थे स्थितस्य भगवतो भूतभावनस्य श्रीसोमनाथस्य सेवनेन मानवः संसारस्य सर्वबन्धनात्प्रमुच्यते, तस्य विस्तारो द्वादशयोजनपरिमितो विस्तृतो वर्तते, तथा च तत्र नैकानि तीर्थानि कथयित्वा मोहिनी स्वयमेव प्रभासतीर्थस्य माहात्म्यस्यान्ते कथयति यथा -

**यः शृणोति नरो भक्त्या श्रावयेद्वा समाहितः ।**
**प्रभासतीर्थमाहात्म्यं सोपि सद्गतिमाप्नुयात्[४] ।।**

महाफलदायिनोवन्तीतीर्थस्य सेवनेन मानवः संसारस्य सर्वबन्धनात्प्रमुच्यते, तथा च तत्र नैकानि तीर्थानि कथयित्वा मोहिनी स्वयमेव अवन्तीतीर्थस्य माहात्म्यस्यान्ते कथयति यथा -

**एतत्ते सर्वमाख्यातं माहात्म्यं पापनाशनम् ।**
**अवन्त्या यन्नरः श्रुत्वा सर्वपापैः प्रमुच्यते[५] ।।**

---

1 श्रीनारदपुराणम् ९।१४६-१४७

2 श्रीनारदपुराणम् ९।१४८

3 श्रीनारदपुराणम् ६८।२५

4 श्रीनारदपुराणम् ७०।२५

5 श्रीनारदपुराणम् ७८।४७

तथा च यो जितेद्रियः पौर्णमास्याम् , चतुर्दश्याम् , संक्रान्तौ, एतेषु शुभदिवसेषु स्वशक्त्या भक्त्यानुसारं कस्मैचिद्दानं प्रयच्छति, तस्योपरि सदा विष्णुमहादेवौ प्रसन्नौ भवतः , तथा च द्दानमनयोः प्रभावादक्षयगुणितं भवति, तथा च नाथवन्तमनाथवन्तं विप्रं कश्चिद् धनाढ्य उद्वावाहयति, तदा तस्य ब्राह्मणस्य शरीरे यावन्ति रोमाणि सन्ति, तावत्कालपर्यन्तं शिवलोके निवासं करोति यथा –

**अनाथं दुर्गतं विप्रं नाथवन्तमथापि वा ।**
**उद्वाहयति यस्तीर्थे तस्य पुण्यफलं शृणु ।।**
**यावत् तद्रोमसंख्या च तत्प्रसूतिकुलेषु च।**
**तावद्वर्षसहस्राणि शिवलोके महीयते[1] ।।**

५.२.६.४. श्रीमत्स्यपुराणे कैवल्यार्थप्रवृत्तिः ।

**इदं गुह्यतमं क्षेत्रं सदा वाराणसी मम ।**
**सर्वेषामेव भूतानां हेतुर्मोक्षस्य सर्वदा ।।**
**अस्मिन् सिद्धाः सदा देवि ! मदीयं व्रतमास्थिताः ।**
**नानालिङ्गधरा नित्यं मम लोकाभिकाङ्क्षिणः[2] ।।**

श्रीमत्स्यपुराणस्य त्रिनवत्यधिकैकशत (१९३) अध्याये नर्मदामाहात्म्यं वर्ण्णयन् मार्कण्डेयः कथयति यद् –

**ततस्त्वनरकं गच्छेत् स्नानं तत्र समाचरेत् ।**
**स्नानमात्रो नरस्तत्र नरकं च न पश्यति[3] ।।**

५.२.६.५. श्रीकूर्मपुराणे कैवल्यार्थप्रवृत्तिः ।

श्रीकूर्मपुराणकारे वाराणसीमाहात्म्यमेकत्रिंशदध्यायतः पञ्चत्रिंशदध्यायस्य पर्य्यन्तं श्रीमता कूर्मपुराणकारेण कृतं वाराणसीमाहात्म्यं

---

1 श्रीमत्स्यपुराणम् १९२।३७-३८

2 श्रीमत्स्यपुराणम् १८०।४७-४८

3 श्रीमत्स्यपुराणम् १९१।१

विस्तारपूर्वकं माहात्म्यस्य वर्ण्णनं वर्तते, विस्तारभयात्केवलं पद्यैर्वाराणसीमाहात्म्यपुष्पैः वाराणसीमहमपि स्तौमि यथा –

**परं गुह्यतमं क्षेत्रं मम वाराणसी पुरी ।**
**सर्वेषामेव भूतानां संसारार्णवतारिणी[1] ।।**
**उत्तमं सर्वतीर्थानां स्थानानामुत्तमञ्च यत् ।**
**ज्ञानानामुत्तमं ज्ञानमविमुक्तं परं मम[2] ।।**
**देवीदं सर्वगुह्यानां स्थानं प्रियतमं मम ।**
**मद्भक्ता यत्र गच्छन्ति मामेव प्रविशन्ति ते[3] ।।**
**मोक्षं सुदुर्लभं ज्ञात्वा संसारं चातिभीषणम् ।**
**अश्मना चरणौ हत्वा वाराणस्यां वसेन्नरः[4] ।।**
**जन्ममृत्युजरामुक्तं परं याति शिवालयम् ।**
**अपुनर्मरणानां हि सा गतिर्मोक्षकाङ्क्षिणाम्[5] ।।**
**यास्यन्ति परमं मोक्षं वाराणस्यां यथा मृताः ।**
**वाराणस्यां विशेषेण गङ्गा त्रिपथगामिनी[6] ।।**
**वाराणसीं समासाद्य पुनाति कुलत्रयम् ।**
**वाराणस्यां महादेवं ये स्तुवन्त्यर्च्चयन्ति च[7] ।।**
**ज्ञात्वा समाहितमनाः कामक्रोधविवर्जितः ।**
**जपेदीशं नमस्कृत्य स याति परमां गतिम्[1] ।।**

---

[1] श्रीकूर्मपुराणम् ३१।२२

[2] श्रीकूर्मपुराणम् ३१।२४

[3] श्रीकूर्मपुराणम् ३१।२८

[4] श्रीकूर्मपुराणम् ३१।३५

[5] श्रीकूर्मपुराणम् ३१।४०

[6] श्रीकूर्मपुराणम् ३१।४९

[7] श्रीकूर्मपुराणम् ३१।५३

श्रीकूर्मपुराणस्यैकचत्वारिंशत्तमाध्यायतोद्विचत्वारिंशत्तमाध्यायपर्य्यन्तं नर्मदाया माहात्म्यं विस्ताररूपेण प्रदत्तमस्ति, किन्तु विस्तारभयात् केवलं कूर्मपुराणस्थैः श्लोकैर्नर्मदामाहात्यरूपां स्तुतिं करोमि, तत्र प्रथमम् एकचत्वारिंशत्तमाध्याये श्लोकाः सन्ति, तत्र श्रीमार्कण्डेयः नर्मदामनेन श्लोकेन स्तौति यथा –

**नर्मदा सरितां श्रेष्ठा सर्वपापविनाशिनी ।**
**मुनिभिः कथिता पूर्वमीश्वरेण स्वयम्भुवा[2] ।।**
**तत्र स्नात्वा नरो राजन्दैवतैः सह मोदते[3] ।।**
**अक्षयं मोदते कालं यावच्चन्द्रदिवाकरौ ।।**
**नर्मदातटमाश्रित्य ये च तिष्ठन्ति मानवाः[4] ।।**
**शुक्लतीर्थं ततो गच्छेत्सर्वपापविनाशिनम् ।**
**नास्ति तेन समन्तीर्थं नर्मदायां युधिष्ठिर[5] ।।**
**सर्वत्र सर्वदिवसे स्नानं तत्र समाचरेत् ।**
**पितॄणां तर्पणं कृत्वा चाश्वमेधफलं लभेत्[6] ।।**

श्रीकूर्मपुराणस्य पूर्वार्द्धे षट्त्रिंशत्तमाध्यायत एकोनत्रिंशत्तमस्य अध्यायपर्य्यन्तं प्रयागस्य माहात्म्यं विस्ताररूपेण प्रदत्तमस्ति, किन्तु विस्तारभयात् केवलं कूर्मपुराणस्थैः श्लोकैः प्रयागमाहात्यरूपां स्तुतिं करोमि, तत्र प्रथमं षट्त्रिंशत्तमाध्याये श्लोकाः सन्ति, तत्रर्षयः प्रयागमनेन श्लोकेन स्तुवन्ति यथा –

---

1 श्रीकूर्मपुराणम् ३५।३३

2 श्रीकूर्मपुराणम् ४१।१

3 श्रीकूर्मपुराणम् ४१।५

4 श्रीकूर्मपुराणम् ४१।२३-२४

5 श्रीकूर्मपुराणम् ४१।६७

6 श्रीकूर्मपुराणम् ४१।१०७

यानि तीर्थानि तत्रैव विश्रुतानि महान्ति वै ।
इदानीं कथयास्माकं सूत सर्वार्थविद्धवान्[1] ।।
एतत्प्रजापतेः क्षेत्रं त्रिषु लोकेषु विश्रुतम् ।
अत्र स्नात्वा दिवं यान्ति ये मृतास्तेपुनर्भवाः[2] ।।
प्रयागं विशतः पुंसः पापं नश्यति तत्क्षणात् ।
योजनानां सहस्रेषु गङ्गां स्मरति यो नरः[3] ।।
तस्य यावन्ति लोमानि सन्ति गात्रेषु सत्तम ।
तावद्वर्षसहस्राणि रुद्रलोके महीयते[4] ।।
षष्टिस्तीर्थं सहस्राणि षष्टिस्तीर्थशतानि च ।
माघमासे गमिष्यन्ति गङ्गायमुनसङ्गमे[5] ।।
यावन्ति रोमकूपाणि तस्य गात्रेषु भूमिप ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते[6] ।।
अधःशिरास्तु यो धारामूर्ध्वपादः पिबेन्नरः ।
सप्तवर्षसहस्राणि स्वर्गलोके महीयते[7] ।।
विहङ्गैरुपभुक्तस्य शृणु तस्यापि यत्फलम् ।
शतं सहस्राणां सोमलोके महीयते[8] ।।
ऋणमोचनं नाम तीर्थन्तु परमं स्मृतम् ।

---

1 श्रीकूर्मपुराणम् ३६।२

2 श्रीकूर्मपुराणम् ३६।२०

3 श्रीकूर्मपुराणम् ३६।२९

4 श्रीकूर्मपुराणम् ३६।४८

5 श्रीकूर्मपुराणम् ३८।१

6 श्रीकूर्मपुराणम् ३८।४

7 श्रीकूर्मपुराणम् ३८।९

8 श्रीकूर्मपुराणम् ३८।१२

**एकरात्रोषितः स्नात्वा ऋणात्तत्र प्रमुच्यते ।।**

**स्वर्गलोकमवाप्नोति अनृणश्च सदा भवेत्[१] ।।**

**यदा सूर्यस्य ग्रहणं कालेन भविता क्वचित् ।**

**सरस्वत्यां तदा स्नात्वा पूता स्वर्गं गमिष्यसि[२] ।।**

५.२.६.६ पद्मपुराणे कैवल्यार्थप्रवृत्तिः ।

नैकानि तीर्थानि गयातीर्थे सन्ति, तत्र गत्वा मनुष्यः केवलं स्नात्वा संसारसमुद्रमनायासेन तरति, अन्ते च श्रीपद्मपुराणकारो लापिडिकातीर्थस्य वर्णनं करोति यद् -

**लाविडिकां ततो गच्छेत् पुण्यां पुण्यनिषेविताम् ।**

**वाजपेयमवाप्नोति विमानस्थश्च पूज्यते[३] ।।**

**भक्त्या शृणोति यो मर्त्यो दीपमाहात्म्यमुत्तमम् ।**

**सर्वपापविनिर्मुक्तः स याति विष्णुमन्दिरम्[४] ।।**

अनेन प्रकारेण पुरुषार्थसिद्धेः कैवल्यार्थं प्रवृत्तिर्विषयोयं सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयान्मया पुरुषार्थसिद्धेः कैवल्यार्थं प्रवृत्तेरयं विषयोत्रैव समाप्यते ।

---

1 श्रीकूर्मपुराणम् ३८।१५-१६

2 श्रीकूर्मपुराणम् ३४।५०

3 पद्मपुराणम् ३।३८।७३

4 पद्मपुराणम् ४।३।३५

५.३ पुराणेषु पुरुषबहुत्ववादः ।

**जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।**
**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव[1] ।।**

सांख्यदर्शनेन स्वीकृतस्य पुरुषबहुत्ववादस्यानुसारं सर्वेषु शरीरेषु आत्मा नैकधा वर्तते, परन्तु प्रत्येकस्मिन् शरीरे आत्मा पृथक्पृथग्वर्तते, तस्यैतानि षट् कारणानि सन्ति तद्यथा –

५.३.१. जननम् ।
५.३.२. मरणम् ।
५.३.३. करणम् ।
५.३.४. अयुगपत्प्रवृत्तिः ।
५.३.५. प्रतिनियमात् ।
५.३.६. त्रैगुण्यविपर्ययः ।

एतैः षड्भिः कारणैर्मतमिदं स्वीकर्तुं शक्नुमो यत् – पुरुषबहुत्ववादो वर्तते, तस्य चर्चां कुर्मः तद्यथा –

५.३.१. जननम् ।

जन्मनो व्यवस्थायाः कारणेन मतमिदमस्ति यद् – आत्मानेकोस्ति । अस्मिन् जगति भिन्ने भिन्ने काले भिन्ने देशेनेकेषां पुरुषाणां जन्मनो दर्शनं कुर्मः, जन्म आत्मनः कदापि न भवति, स आत्मापरिणामी वर्तते, शरीरस्यैव जन्म भवति, तथापि शरीरेण सहात्मनः सम्बन्धं विना शरीरजन्म भवितुं

---

1 सांख्यकारिका–१८

नार्हति, अनेन कारणेन आत्मनि जन्मनो व्यवहारं कुर्मः । इत्थं जननकारणेन स्वीकारं कर्तुं शक्नुमो यत् – सांख्यदर्शनेन पुरुषबहुत्ववादः स्वीकृतोऽस्ति, तमेव सांख्यदर्शनेन स्वीकृतं पुरुषबहुत्ववादं सर्वाणि पुराणान्यनेन प्रकारेण कथयन्ति तद्यथा –

५.३.१.१. श्रीविष्णुपुराणे पुरुषबहुत्ववादजननम् ।

**ब्रह्मा नारायणाख्योसौ कल्पादौ भगवान् यथा ।**
**ससर्ज सर्व्वभूतानि तदाचक्ष्व महामुने[१] ।।**

श्रीविष्णुपुराणस्य प्रथमांशस्य चतुर्थाध्याये श्रीमैत्रेयेण संपृष्टः श्रीपराशरः स्वयमेव पुरुषबहुत्ववादे 'जननम्' इति विषयं चर्चयित्वा पुरुषबहुत्ववादस्य पुष्टिमनेन प्रकारेण करोति यद् –

**प्रजाः ससर्ज भगवान् ब्रह्मा नारायणात्मकः ।**
**प्रजापतिपतिर्देवो यथा तन्मे निशामय ।।**
**अतीतकल्पावसाने निशासुप्तोत्थितः प्रभुः ।**
**सत्त्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमवैक्षत ।।**
**नारायणः परोचिन्त्यः परेषामपि स प्रभुः ।**
**ब्रह्मस्वरूपी भवगाननादिः सर्व्वसम्भवः ।।**
**इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ।**
**ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययम्[२] ।।**
**ब्रह्मरूपधरो देवस्ततोसौ रजसा वृतः ।**
**चकार सृष्टिं भगवांश्चतुर्व्वक्त्रधरो हरिः ।।**
**निमित्तमात्रमेवासीत्सृज्यतां सर्गकर्म्मणि ।**
**प्रधानकारणीभूता यतो वै सृज्यशक्तयः[१] ।।**

---

[1] पद्मपुराणम् १।४।१

[2] पद्मपुराणम् १।४।२-५

अनेन प्रकारेण पुरुषबहुत्ववादे षट्सु कारणेषु 'जननम्' इति विषयोयं सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयान्मया पुरुषबहुत्ववादे षट्सु कारणेषु 'जननम्' इति विषयोत्रैव समाप्यते ।

५.३.२. मरणम् ।

मरणस्य व्यवस्थायाः कारणेन आत्मा नैकविधो वर्तते, इति स्वीकारं विना नान्यः पन्था अस्ति, किन्त्वेक आत्मा स्यात्तदा सर्वेषां जीवानां मृत्युरेकस्मिन् समये भवितुमर्हति, इत्थं मरणकारणेन स्वीकारं कर्तुं शक्नुमो यत् - सांख्यदर्शनेन पुरुषबहुत्ववादः स्वीकृतोस्ति, तमेव सांख्यदर्शनेन स्वीकृतं पुरुषबहुत्ववादं सर्वाणि पुराणान्यनेन प्रकारेण कथयन्ति तद्यथा -

५.३.२.१. श्रीविष्णुपुराणे पुरुषबहुत्ववादमरणम् ।

श्रीविष्णुपुराणस्य प्रथमांशस्य चतुर्थाध्याये श्रीमैत्रेयेण संपृष्टः श्रीपराशरः स्वयमेव पुरुषबहुत्ववादे 'मरणम्' इति विषयं चर्चयित्वा पुरुषबहुत्ववादस्य पुष्टिमनेन प्रकारेण करोति यद् -

**त्वं कर्ता परमात्मात्मन् पुरुषात्मन्ननमोस्तु ते ।**
**प्रधानव्यक्तभूताय कालभूताय ते नमः ।।**
**त्वं कर्ता सर्व्वभूतानां त्वं पाता त्वं विनाशकृत् ।**
**सर्गादिषु प्रभो ब्रह्मविष्णुरुद्रात्मरूपधृक्[2] ।।**
**तं तुष्टुवुस्तापपरीतचेतसो**
**लोके जने ये निवसन्ति योगिनः ।**
**सनन्दनाद्या नतिनम्रकन्धरा धराधरं धीरतरोद्धतेक्षणम् ।।**
**जयेश्वराणां परमेश केशव प्रभो गदाशंखधरासि चक्रधृक् ।**
**प्रसूतिनाशस्थितिहेतुरीश्वरस्त्वमेव नान्यत्परमं च परम्[1] ।।**

---

1 पद्मपुराणम् १।४।५०-५१

2 पद्मपुराणम् १।४।१५-१६

अनेन प्रकारेण पुरुषबहुत्ववादे षट्सु कारणेषु द्वितीयं कारणं 'मरणम्' इति विषयोयं सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयान्मया पुरुषबहुत्ववादे षट्सु कारणेषु 'मरणम्' इति विषयोत्रैव समाप्यते ।

५.३.३. करणम् ।

क्रियतेनेनेति करणं क्रियायां साधकतममस्ति, करणस्य व्यवस्थायाः कारणेन पुरुषबहुत्ववादः सिद्धो भवति । चक्षुरित्यादीनि त्रयोदश करणानि सन्ति, यद्यात्मैकस्तदा विकलैरविकलैश्चक्षुरित्यादिभिरिन्द्रियैः सह संयोगम् अवलोकमानमात्मानमन्धं करोति, किन्तु तादशृं किमपि न भवति, किन्तु जगत्यस्मिन् कश्चिदन्धो वर्तते, कश्चिदन्धो नास्ति, अतः सर्वे जीवा अन्धा न सन्ति, तथैव सर्वे दर्शनक्षमा अपि न सन्ति, अनया व्यवस्थया पुरुषबहुत्ववादो वर्तते, इत्थं करणकारणेन स्वीकारं कर्तुं शक्नुमो यत् - सांख्यदर्शनेन पुरुषबहुत्ववादः स्वीकृतोस्ति, तमेव सांख्यदर्शनेन स्वीकृतं पुरुषबहुत्ववादं सर्वाणि पुराणान्यनेन प्रकारेण कथयन्ति तद्यथा -

५.३.३.१. श्रीविष्णुपुराणे पुरुषबहुत्ववादकरणम् ।

श्रीविष्णुपुराणस्य प्रथमांशस्य चतुर्थाध्याये श्रीमैत्रेयेण संपृष्टः श्रीपराशरः स्वयमेव पुरुषबहुत्ववादे 'करणम्' इति विषयं चर्चयित्वा पुरुषबहुत्ववादस्य पुष्टिमनेन प्रकारेण करोति यद् -

**पादेषु वेदास्तव यूपदंष्ट्र**
**दन्तेषु यज्ञाश्चिनयश्च वक्त्रे ।**
**हुताशजिह्वोसि तनूरुहाणि**
**दर्भाः प्रभो यज्ञपुमांस्त्वमेव ।।**
**त्रिलोचने रात्र्यहनी महात्मन् सर्व्वाश्रयं ब्रह्मपदं शिरस्ते ।**

[1] पद्मपुराणम् १।४।३०-३१

**सूक्तान्यशेषाणि सटाकलापोघ्राणं समस्तानि हवींषि देव[१] ।।**

अनेन प्रकारेण पुरुषबहुत्ववादे षट्सु कारणेषु 'करणम्' इति विषयोयं सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयान्मया पुरुषबहुत्ववादे षट्सु कारणेषु 'करणम्' इति विषयोंत्रैव समाप्यते ।

५.३.४. अयुगपत्प्रवृत्तिः ।

इयमयुगपत्प्रवृत्तिर्बहुत्वमात्मानं सिद्ध्यति । प्रयत्नरूपा प्रवृत्तिरन्तःकरणस्य धर्मो वर्तते, परन्त्वन्तःकरणस्य पुरुषेण सह संयोगाद् अन्तःकरणगतायाः प्रवृत्तेः पुरुष आरोपो भवति, यद्यात्मैको वर्तते, तदा धर्मे प्रवृत्तेन अन्तःकरणेन सह तत्संयोगत्वाज्जगतः सर्वे जीवा धर्मे प्रवृत्ता भवेयुः, किन्तु तादृशं वयं न पश्यामः, यद्यात्मैकः स्यात्तदा धर्मे प्रवृत्तेनान्तःकरणेन तथा अधर्मे प्रवृत्तेनान्तःकरणेन सह संयोगाद्धर्धस्याधर्मस्य प्रवृत्तिर्भवेत् , तादृशी परिस्थितिस्तु न दृश्यते, अतः सिद्धान्तयो सूचयति यत् - अनया व्यवस्थया पुरुषबहुत्ववादो वर्तते, इत्थमयुगपत्प्रवृत्तिकारणेन स्वीकारं कर्तुं शक्नुमो यत् - सांख्यदर्शनेन पुरुषबहुत्ववादः स्वीकृतोस्ति, तमेव सांख्यदर्शनेन स्वीकृतं पुरुषबहुत्ववादं सर्वाणि पुराणान्यनेन प्रकारेण कथयन्ति तद्यथा -

५.३.४.१. श्रीविष्णुपुराणे पुरुषबहुत्ववादेयुगपत्प्रवृत्तिः ।

श्रीविष्णुपुराणस्य प्रथमांशस्य चतुर्थाध्याये श्रीमैत्रेयेण संपृष्टः श्रीपराशरः स्वयमेव पुरुषबहुत्ववादे 'अयुगपत्प्रवृत्तिः' इति विषयं चर्चयित्वा पुरुषबहुत्ववादस्य पुष्टिमनेन प्रकारेण करोति यद् -

**यदेतद् दृश्यते मूर्तमेतज्ज्ञानात्मनस्तव ।**
**भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ।।**
**ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।**
**अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे[१]।।**

---
[1] पद्मपुराणम् १।४।३२-३३

अनेन प्रकारेण पुरुषबहुत्ववादे षट्सु कारणेषु 'अयुगपत्प्रवृत्तिः' इति विषयोयं सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयान्मया पुरुषबहुत्ववादे षट्सु कारणेषु 'अयुगपत्प्रवृत्तिः' इति विषयोत्रैव समाप्यते ।

५.३.५. प्रतिनियमात् ।

सुखदुःखमोहात्मकस्य गुणत्रयस्य विपर्ययः पुरुषबहुत्ववादं सिद्ध्यति । एकः पुरुषस्तदा सर्वे जीवाः सुखदुःखैः समाना भवेयुः । सांख्यदर्शनस्य मतानुसारं सत्त्वगुणप्रधाना देवाः सन्ति, रजोगुणप्रधाना मनुष्याः सन्ति, तमोगुणप्रधाना पशुपक्षिणः सन्ति, किन्तु सर्वेषां देवानामात्मा मनुष्याणामात्मतो भिन्नो नास्ति, अतः कश्चन भेदो नास्ति । सत्त्वबहुलानां देहेन्द्रियाणां य आत्मनो घनिष्ठः सम्बन्धोस्ति, स देवः कथितो वर्तते, एतेषां गुणानां तारतम्येन मनुष्यपश्वादिसंज्ञायाः प्रयोग एव पुरुषबहुत्ववादं कथयति, इत्थं प्रतिनियमकारणेन स्वीकारं कर्तुं शक्नुमो यत् - सांख्यदर्शनेन पुरुषबहुत्ववादः स्वीकृतोस्ति, तमेव सांख्यदर्शनेन स्वीकृतं पुरुषबहुत्ववादं सर्वाणि पुराणान्यनेन प्रकारेण कथयन्ति तद्यथा -

५.३.५.१. श्रीविष्णुपुराणे पुरुषबहुत्ववादप्रतिनियमः ।

श्रीविष्णुपुराणस्य प्रथमांशस्य पञ्चमेध्याये श्रीमैत्रेयेण संपृष्टः श्रीपराशरः स्वयमेव पुरुषबहुत्ववादे 'प्रतिनियमः' इति विषयं चर्चयित्वा पुरुषबहुत्ववादस्य पुष्टिमनेन प्रकारेण करोति यद् -

**कर्मभिर्भाविताः पूर्व्वैः कुशलाकुशलैस्तुताः ।**
**ख्यात्या तया ह्यनिर्मुक्ताः संहारे ह्युपसंहृताः ।।**
**स्थावरान्ताः सुराद्यास्तु प्रजा ब्रह्मंश्चतुर्विधाः ।**
**ब्रह्मणः कुर्व्वतः सृष्टिं जज्ञिरे मानसास्तु ताः ।।**

---

[1] पद्मपुराणम् १।४।३९-४०

**ततो देवासुरपितॄन्मानुषांश्च चतुष्टयम् ।**
**सिसृक्षुरम्भांस्येतानि स्वमात्मानमयूयुजत्[1] ॥**

अनेन प्रकारेण पुरुषबहुत्ववादे षट्सु कारणेषु 'प्रतिनियमः' इति विषयोयं सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयान्मया पुरुषबहुत्ववादे षट्सु कारणेषु 'अयुगपत्प्रवृत्तिः' इति विषयोत्रैव समाप्यते ।

५.३.६. त्रैगुण्यविपर्ययः ।

यद्यात्मैक एव वर्तते, तदा पुण्यवन्तः स्वर्गं गच्छन्ति, तथैव पापिनो नरकं गच्छन्ति, इत्यर्थवत्यः श्रुतयः स्मृत्यश्च संभवितुमेवा नार्हन्ति, एतावत्यः श्रुतयः स्मृत्यश्च पुरुषबहुत्ववादं कथयन्ति, इत्थं त्रैगुण्यविपर्ययस्य कारणेन स्वीकारं कर्तुं शक्नुमो यत् – सांख्यदर्शनेन पुरुषबहुत्ववादः स्वीकृतोस्ति, तमेव सांख्यदर्शनेन स्वीकृतं पुरुषबहुत्ववादं सर्वाणि पुराणान्यनेन प्रकारेण कथयन्ति तद्यथा –

५.३.६.१. श्रीविष्णुपुराणे पुरुषबहुत्ववादत्रैगुण्यविपर्ययः ।

श्रीविष्णुपुराणस्य प्रथमांशस्य षष्ठेध्याये श्रीमैत्रेयेण संपृष्टः श्रीपराशरः स्वयमेव पुरुषबहुत्ववादे 'त्रैगुण्यविपर्ययः' इति विषयं चर्चयित्वा पुरुषबहुत्ववादस्य पुष्टिमनेन प्रकारेण करोति यद् –

**योगिनाममृतं स्थानं यद्विष्णोः परमं पदम् ।**
**एकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये ।**
**तेषां तत्परमं स्थानं यत्तु पश्यन्ति सूरयः ॥**
**गत्वा गत्वा निवर्तन्ते चन्द्रसूर्य्यादयो ग्रहाः ।**
**अद्यापि न निवर्तन्ते द्वादशाक्षरचिन्तकाः ॥**
**तामिस्रमन्धतामिस्रं महारौरवरौरवौ ।**
**असिपत्रवनं घोरं कालसूत्रमवोचिमत् ॥**
**विनिन्दकानां वेदस्य यज्ञव्याघातकारिणाम् ।**

---
[1] पद्मपुराणम् १।५।२६-२८

**स्थानमेतत्समाख्यातं स्वधर्म्मत्यागिनश्च[१] ।।**

अनेन प्रकारेण पुरुषबहुत्ववादे षट्सु कारणेषु ‘प्रतिनियमः’ इति विषयोयं सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयान्मया पुरुषबहुत्ववादे षट्सु कारणेषु ‘त्रैगुण्यविपर्ययः’ इति विषयोत्रैव समाप्यते ।

५.४ पुराणेषु पुरुषधर्म्माः ।

**तस्माच्च विपर्ययात्सिद्धं साक्षित्वमस्य पुरुषस्य ।**

**कैवल्यं माध्यस्थ्यं द्रष्टृमकर्तृभावश्च[२] ।।**

प्रकृतिशब्दस्य प्रयोगो विभिन्नेषु लिङ्गेषु पृथक्पृथक् प्राप्तो भवति । विभिन्नेषु लिङ्गेषु प्राप्तत्वादपि नपुंसकलिङ्गेपि द्रष्टव्योस्ति तद्यथा –

१. अचेतनम् ।

२. अजा ।

३. क्षेत्रम् ।

४. ज्ञानम् ।

५. जगत् ।

६. कर्त्री ।

७. बहुप्रजाः ।

यत्रैकमेव तत्त्वमद्वैतस्य विश्लेषणं करोति, तत्र प्रकृतिपुरुषौ समानौ वर्तेते, यत्राद्वैतस्य स्थितिरन्यथा भवति, तदा पुरुषानन्तरं प्रकृतेर्महत्तत्त्वमन्यथा दृश्यते, अतः प्रकृतिरेव स्वभावो योनिश्च वर्तते । पुरुषो नाम जीवः केवलं कृतस्य अभिमानेन स्वं जानाति, तदा सूक्ष्मशरीरस्य माध्यमेन विभिन्नासु योनिषु मोक्षपर्यन्तं भ्रमति तथा क्लेशसहनं करोति, सर्वाणि पुराणानि पुरुषधर्म्माणां निरूपणमनेन प्रकारेण कुर्व्वन्ति तद्यथा –

---

[1] पद्मपुराणम् १।६।३८–४१

[2] सांख्यकारिका–१९

५.४.१ श्रीमद्भागवतपुराणे पुरुषधर्म्माः ।

सर्वप्रथमं श्रीमद्भागवतपुराणं पुरुषधर्म्माणां निरूपणमनेन प्रकारेण करोति तद्यथा -

**प्रकृत्यां चैव तत्सर्वं पुण्यं पापं प्रतिष्ठति ।**
**योन्यवस्था स्वभावे च देहिनां तु निषिध्यते ।।**
**अव्यक्तस्थानि तान्येव पुण्यपापानि जन्तवः ।**
**योजयन्ति पुनर्देहं देहान्यत्वे तथैव च ।।**
**धर्माधर्मौ तु जन्तूनां गुणमात्रात्मकावुभौ ।**
**करणैः स्वैः प्रलीयेते कायत्वेनेह जन्तुभिः[१] ।।**

५.४.२ श्रीब्रह्माण्डपुराणे पुरुषधर्म्माः ।

पुराणेषु श्रीब्रह्माण्डपुराणं पुरुषधर्म्माणां निरूपणमनेन प्रकारेण कुर्व्वन्ति तद्यथा -

**सर्गे च प्रतिसर्गश्च संसारे चैव जन्तवः ।**
**संयुज्यन्ते वियुज्यन्ते करणैः संचरन्ति च[२] ।।**

५.४.३ श्रीलिङ्गपुराणे पुरुषधर्म्माः ।

पुराणेषु श्रीलिङ्गपुराणं चतुर्युगशिष्टानां पुरुषधर्म्माणां निरूपणमनेन प्रकारेण कुर्व्वन्ति तद्यथा -

**सत्त्वं कृतं रजस्त्रेता द्वापरं च रजस्तमः ।**
**कलिस्तमश्च विज्ञेयं युगवृत्तिर्युगेषु ।।**
**ध्यानं परं कृतयुगे त्रेतायां यज्ञ उच्यते ।**
**भजनं द्वापरे शुद्धं दानमेव कलौ युगे[३] ।।**

५.४.४ श्रीवायुपुराणे पुरुषधर्म्माः ।

---

[1] श्री. भा. पुराणम्-११।२४।१७-१८

[2] ब्रह्माण्डपुराणम्-४।३।२४

[3] लिङ्गपुराणम्-पूर्वभागः-३९।६।७

पुराणेषु वायुपुराणं सर्वेषां पुरुषधर्म्माणां निरूपणमनेन प्रकारेण कुर्व्वन्ति तद्यथा –

**यस्तु यस्यादिरन्तश्च स वै मध्यं च तस्य सन् ।**
**विकारो व्यवहारार्थो यथा तैजसपार्थिवः ॥**
**यदुपादाय पूर्वस्तु भावो विकुरुते माम् ।**
**आदिरन्तो यदा यस्य तत्सत्यमभिधीयते[१] ॥**
**अव्यक्तकारणं यत्तु नित्यं सदसदात्मकम् ।**
**प्रधानं प्रकृतिं चैव यमाहुस्तत्त्वचिन्तकाः ॥**
**गन्धवर्णरसैर्हीनं शब्दस्पर्शविवर्जितम् ।**
**अजातं ध्रुवमक्षय्यं नित्यं स्वात्मन्यवस्थितम् ॥**
**जगद्योनिं महद्भुतं परं ब्रह्मन् सनातनम् ।**
**विग्रहं सर्वभूतानामव्यक्तमभवत्किल ॥**
**अनाद्यन्तमजं सूक्ष्मं त्रिगुणं प्रभवाप्ययम् ।**
**असाम्प्रतमविज्ञेयं ब्रह्माग्रे समवर्तत[२] ॥**
**गुणसाम्ये तदा तस्मिन्पुरुषे चात्मनि स्थिते[३] ॥**

अतः प्रकृतिपुरुषद्वयं सनातनकालीनमस्ति, सृष्टिरित्यादीनां कारणं प्रकृतिपुरुषद्वयं वर्तते । प्रकृतिपुरुषद्वयमनाद्यजातमस्ति ।

---

1 वायुपुराणम्–४।१०२।५०–५२

2 वायुपुराणम्–१।४।१७–२१

3 भविष्यपुराणम्–२।७७।२

५.५ पुराणेषु सृष्टिव्यवस्था ।

**प्रकृतेर्महांस्ततोहंकारस्तस्माद् गणश्च षोडशकः ।**

**तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि[1] ।।**

आचार्य्य ईश्वरकृष्णः सांख्यकारिकायां सृष्टेरुत्पत्तेर्मूलकारणं प्रकृतिं मन्यते । अत्र सत्त्वरजस्तमसां त्रिगुणानां साम्यावस्था कथिता वर्तते, तथा च प्रकृतेर्नैकानि नामान्यनेन प्रकारेण कथितानि सन्ति तद्यथा –

१. प्रधाना प्रकृतिः ।

२. अव्यक्ता प्रकृतिः ।

३. कारणभूता प्रकृतिः ।

४. तमोबहुला प्रकृतिः ।

५. गुणसाम्या प्रकृतिः ।

६. अव्याकृता प्रकृतिः ।

पुरुषस्य प्रकाशेन मूलप्रकृतितः सर्वप्रथमं महत्तत्त्वस्य समुत्पत्तिर्भवति । पुरुषोत्र नित्यत्वेन स्वीकृतो वर्तते । आचार्य्य ईश्वरकृष्णः सांख्यकारिकायां पुरुषप्रकृतीति तत्त्वद्वयं नित्यं मन्यमानः सर्वप्रथमं महत्तत्त्वतो बुद्धिः, तस्या नैकानि नामान्यनेन प्रकारेण कथितानि सन्ति तद्यथा –

१. मतिः ।

२. प्रत्ययः ।

---

[1] सांख्यकारिका-२२

३. महान् ।

४. उपलब्धिः ।

ततोहंकारः समुत्पन्नः । सृष्टिव्यवस्थायामिदं ध्यातव्यमस्ति यत् – सांख्यदर्शनेन स्वीकृतस्य सत्कार्यवादस्य सिद्धान्तस्य कारणेन मूलप्रकृतौ त्रिगुणत्वात् समुत्पन्नेषु सर्वेषु पदार्थेषु त्रयो गुणा विद्यमाना भवन्ति, अन्तरं केवलमात्राया भवति । सा मात्रा कुत्रचित्सत्त्वप्रधाना, कुत्रचिद् रजःप्रधाना, कुत्रचित्तमःप्रधाना भवति, तदनन्तरं सत्त्वप्रधानाहंकारात्पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, मनः, ततः पञ्च तन्मात्रा, अनेन प्रकारेण षोडशानां गणो वर्तते, सांख्यकारिकाया इयं कारिका कथयति तद्यथा –

**बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।**
**वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः[१] ।।**
**बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि ।**
**वाग्भवति शब्दविषया शेषाणि तु पञ्च विषयाणि[२] ।।**

अत्र रजोगुणस्य भूमिका तदुत्पत्तौ प्रेरकसमाना भवति । पञ्चतन्मात्रातः पञ्चानां महाभूतानामुत्पत्तिः कथितास्ति, इत्थं सर्व्वाणि पुराणानि सृष्टिव्यवस्थाम् अनेन कारणेन कथयन्ति तद्यथा –

५.५.१. श्रीविष्णुपुराणे सृष्टिव्यवस्था ।

श्रीविष्णुपुराणस्य प्रथमांशस्य चतुर्थेध्याये श्रीमैत्रेयेण संपृष्टः श्रीपराशरः स्वयमेव सृष्टिव्यवस्थानामकं विषयं चर्चयित्वा पुरुषबहुत्ववादस्य पुष्टिमनेन प्रकारेण करोति यद् –

**ततः क्षितिं समां कृत्वा पृथिव्यां सोपिनोद्गिरीन्।**
**यथा विभागं भगवाननादिः परमेश्वरः ।।**
**प्राक् सर्गदग्धानखिलान्पर्वतान्पृथिवीतले ।**

---

1 सांख्यकारिका–२६

2 सांख्यकारिका–३४

**अमोघेन प्रभावेण ससर्जामोघवाञ्छितः ।।**
**भूविभागं ततः कृत्वा सप्तद्वीपं यथातथम् ।**
**भूराद्यांश्चतुरो लोकान्पूर्ववत्समकल्पयत् ।।**
**ब्रह्मरूपधरो देवस्ततोसौ रजसा वृतः ।**
**चकार सृष्टिं भगवांश्चतुर्व्वक्त्रधरो हरिः ।।**
**निमित्तमात्रमेवासीत्सृज्यनां सर्गकर्मणि ।**
**प्रधानकारणीभूता यतो वै सृज्यशक्तयः ।।**
**निमित्तमात्रं मुक्त्वैकं नान्यत्किञ्चिदवेक्षते ।**
**नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तु वस्तुताम्[१] ।।**

तदनन्तरं श्रीविष्णुपुराणस्य प्रथमांशस्य पञ्चमेध्याये श्रीमैत्रेयेण संपृष्टः श्रीपराशरः स्वयमेव सृष्टिव्यवस्थानामकं विषयं चर्चयित्वा सृष्टिव्यवस्थायाः पुष्टिमनेन प्रकारेण करोति यद् –

**सत्याभिध्यायिनः पूर्व्वं सिसृक्षोर्ब्रह्मणो जगत् ।**
**अजायन्त द्विजश्रेष्ठ सत्त्वोद्रिक्ता मुखात्प्रजाः ।।**
**वक्षसो रजसोद्रिक्तास्तथा वै ब्रह्मणोभवन् ।**
**रजसा तमसा चैव समुद्रिक्तास्तथोरुजाः ।।**
**पद्भ्यामन्याः प्रजा ब्रह्मा ससर्ज द्विजसत्तम ।**
**तमःप्रधानास्ताः सर्वाश्चतुवर्ण्यमिदं ततः ।।**
**ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम ।**
**पादोरुवक्षःस्थलतो मुखतश्च समुद्गताः ।।**
**यज्ञनिष्पत्तये सर्वमेतद् ब्रह्मा चकार वै ।**
**चातुर्वर्ण्यं महाभाग यज्ञसाधनमुत्तमम् ।।**
**यज्ञैराप्यायिता देवा वृष्ट्युत्सर्गेण वै प्रजाः ।**
**आप्याययन्ते धर्मज्ञ यज्ञाः कल्याणहेतवः[१] ।।**

---

[1] श्रीविष्णुपुराणम् १।४।४७–५२

अनेन प्रकारेण 'सृष्टिव्यवस्था' इति विषयोयं सर्वेषु पुराणेषु चर्चितो वर्तते, विस्तारभयान्मया 'सृष्टिव्यवस्था' इति विषयोंत्रैव समाप्यते ।

५.६ पुराणेषु बुद्धिस्वरूपम् ।

**अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।**

**सात्त्विकमेतद् रूपं तामसमस्माद्विपर्यस्तम्[2] ।।**

सर्वेषु व्यक्तेषु तत्त्वेषु बुद्धितत्त्वं सर्वस्मात्सूक्ष्मं तत्त्वं वर्तते, तथोत्पत्तेः क्रमे प्रथमसूक्ष्मस्याविर्भावः संजातः, तदनन्तरं कार्य्ये सूक्ष्मता शनैश्शनैर्निम्ना जायते, अनेन कारणेन महत्तत्त्वस्याविर्भावः सर्वप्रथमं भवति ।

प्रत्येकस्य जीवस्य समीपे स्वस्य भाग्यानुसारं बुद्धिर्वा महत्तत्त्वं भवति, इयं बुद्धिः त्रिविधा वर्तते तद्यथा –

१. सात्त्विकी बुद्धिः ।

२. तामसी बुद्धिः ।

३. राजसी बुद्धिः ।

आचार्य ईश्वरकृष्णः कथयति यत् – प्रकृतेराद्यं कार्यं बुद्धिरस्ति । प्रकृतेः प्रथमकार्यत्वाद् 'महान्' इत्यपि कथितमस्ति, बुद्धिरेका रहस्यपूर्णो विषयो वर्तते, सर्व आचार्याः कथयन्ति यद् – अध्यवसायो बुद्धिः' इति बुद्धेः स्वरूपमस्ति, व्यापारभेदेन बुद्धेर्नैकानि नामानि कथितानि सन्ति तद्यथा –

१. मनः ।

२. मतिः ।

३. ख्यातिः ।

---

[1] पद्मपुराणम् १।५।३-८

[2] सांख्यकारिका-२३

४. बुद्धिः ।

५. प्रज्ञा ।

६. स्मृतिः ।

७. प्रकृतिः ।

केषांचिद्विदुषां मतमिदमस्ति यद् - इदं तत्त्वं प्रकृतेरपेक्षयाधिकं स्थूलं वर्तते, अनेन कारणेन बुद्धिरियं प्रकृतेरपेक्षया महती विद्यते । सर्वेषां पुराणानां मतमिदमस्ति यद् - आत्मनो भोगस्य मोक्षस्य च सम्पादनमेव बुद्धेः परमं प्रयोजनमस्ति । आत्मन आश्रयं गृहीत्वा सर्व्वान् विषयान् प्रति प्रतिष्ठते, इत्थं सर्व्वाणि पुराणानि बुद्धिस्वरूपम् अनेन कारणेन कथयन्ति तद्यथा -

### ५.६.१. श्रीमद्भागवतमहापुराणे बुद्धिस्वरूपम् ।

सर्वप्रथमं श्रीमद्भागवतपुराणं बुद्धिस्वरूपस्य निरूपणमनेन प्रकारेण करोति तद्यथा -

**बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत् ।**
**बोधेनांशेन बोद्धव्यप्रतिपत्तिर्यतो मवेत्[1] ।।**

**वत्स प्रह्लाद भद्रं ते सत्यं कथय मा सृपा ।**
**बालानति कृतस्तुभ्यमेष बुद्धिविपर्ययः ।।**
**बुद्धिभेदः परकृत उताहो ते स्वतोभवत् ।**
**मण्यतां श्रोतुकामानां गुरूणां कुलनन्दन[2] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु श्रीमद्भागवतपुराणमिव बुद्धिस्वरूपस्य वर्ण्णनं कृतमस्ति, विस्तारभयादिदमुपप्रकरणमत्रैव समाप्नोमि ।

### ५.७ पुराणेषु अहङ्कारस्वरूपम् ।

अभिमानोहङ्कारः तस्माद् द्विविधः प्रवर्तते सर्गः ।
एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव[1] ।।

---

[1] श्री. भा. पुराणम्-३।७।२३

[2] श्री. भा. पुराणम्-७।५।९-१०

प्रकृतेर्द्वितीयो विकारोहंकारोस्ति, स महत्तत्त्वस्य परिणामो वर्तते । 'अहम्' तथा 'मम' इत्यभिमानमहंकारस्य वृत्तिरस्ति, अनेनाभिमानेन पुरुषो भ्रमे पतित्वा स्वात्मानं कर्तारं स्वामिनं च मन्यते । सर्वाणीन्द्रियाणि सामान्यरूपेण वस्तूनि गृह्णन्ति । मनस्तद्विशेषरूपेण ग्रहणं करोति, तदनन्तरमस्माकं 'एते विषया मम सन्ति' 'एते विषया तव सन्ति' अहं भोक्तास्मि, अहं ज्ञातास्मि, अहं कर्तास्मि, इत्यादयोभिमानेन जायन्ते, अतोहंकार एव सर्वेषां सांसारिकव्यवहाराणां मूलमस्ति । अयमेवाहंकारस्त्रिविधो वर्तते, तद्यथा –

१. वैकृतो नाम सात्त्विकोहंकारः ।

२. तैजसो नाम राजसोहंकारः ।

३. भूतादिर्नाम तामसोहंकारः ।

यदाहंकारे रजोगुणतमोगुणौ सम्मोह्य सत्त्वगुणः प्रबलो भवति, तदा तमहंकारं प्राचीनचार्य्या वैकृतमहंकारं कथयन्ति, यदाहंकारे सत्त्वगुणरजोगुणौ सम्मोह्य तमोगुणः प्रबलो भवति, तदा तमहंकारं प्राचीनचार्य्या भूतादिं कथयन्ति, यदाहंकारे सत्त्वगुणतमोगुणौ सम्मोह्य रजोगुणः प्रबलो भवति, तदा तमहंकारं प्राचीनचार्य्या तैजसमहंकारं कथयन्ति । त्रिगुणात्मकोऽहंकार एकतत्त्वादपि गुणविशेषस्योद्भवेन अभिभवेन च विभिन्नानि नामानि विभिन्नानि कार्याणि संभवितुं शक्नुवन्ति ।

अहंकारतत्त्वाद् द्विविधा सृष्टिरुद्भवति, एकादशेन्द्रियाणि तथा पञ्च तन्मात्राणि । एकादशेन्द्रियाणि सत्त्वगुणप्रधानानि सन्ति, तथा पञ्च तन्मात्राणि तमोगुणप्रधानानि सन्ति, इत्थं सर्व्वाणि पुराणानि 'अहङ्कारस्वरूपम्' इति विषयमनेन कारणेन कथयन्ति तद्यथा –

५.७.१. श्रीमद्भागवतमहापुराणेहङ्कारस्वरूपम् ।

---

[1] सांख्यकारिका-२४

सर्वप्रथमं श्रीमद्भागवतपुराणमहङ्कारस्वरूपस्य निरूपणमनेन प्रकारेण करोति तद्यथा –

**महत्तत्त्वाद्विकुर्वाणाद्भगवतद्वीर्यसम्भवात् ।**
**क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत ।।**
**वैकारिकस्तैजसश्च तामसश्च यतो भवः ।**
**मनसश्चैन्द्रियाणां च भूतानां महतामपि[१] ।।**
**स एष यर्हि प्रकृतेर्गुणेष्वभिषज्जते ।**
**अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते[२] ।।**
**भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया ।**
**लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः ।।**
**मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा ।**
**नष्टेहंकरणे द्रष्टा नष्टवित्त इवातुरः ।।**
**एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते ।**
**साहंकारस्य द्रव्यस्य योवस्थानमनुग्रह[३] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु श्रीमद्भागवतपुराणमिव बुद्धिस्वरूपस्य वर्ण्णनं कृतमस्ति, विस्तारभयादिदमुपप्रकरणमत्रैव समाप्नोमि ।

अनेन प्रकारेण मम शोधमहानिबन्धस्य पञ्चमे प्रकरणे पुराणेषु पुरुषसिद्धिः, पुराणेषु पुरुषबहुत्ववादः, पुराणेषु पुरुषधर्म्माः, पुराणेषु सृष्टिव्यवस्था, पुराणेषु बुद्धिस्वरूपम् , पुराणेषु अहङ्कारस्वरूपम् – इत्यादीनां विषयाणां सर्व्वाणि पुराणान्यालोड्य विमर्शः कृतो वर्तते, विस्तारभयादत्र न प्रस्तूयते ।

---

[1] श्री. भा. पुराणम्–३।२६।२३–२४

[2] श्री. भा. पुराणम्–३।२७।२

[3] श्री. भा. पुराणम्–७।२७।१४–१६